# श्रीमद्भागवतस्य सिद्धान्त :

**Dr POLA UMAMAHESWARA RAO**
**LECTURER IN SANSKRIT**
**DrV.S.K.G.D.COLLEGE(A)**
**umamahes.pola@gmail.com**

भगवता वासुदेवेन कृष्णेन गीतावर्णितानां सिध्दान्तानां रूपे यस्य भागवतधर्मस्य उपदेशः दत्तः, तस्य एव विस्तार: सोदाहरणम् व्याख्यानं वा श्रीमद् भगवते
समुपलभ्यते । गीताप्रतिपादिते भागवतधर्मे ये सिध्दान्ताः मूलरूपे दृष्टिगोचराः भवन्ति, तेषामेवात्र विकास: कृतः दृश्यते । येन ते सुतरां स्पष्टतया भासते I एतदतिरिक्तं, अत्र उध्दवाय उपदेशं ददता भगवता वासुदेवेन श्रीकृष्णेन तस्मै उपदिश्यमानस्य एकस्य विषयस्य सम्बन्धे इदं स्पष्टं एवं उक्तं यत् अयंएव विषयः तेन पूर्वं अर्जुनाय उपदिष्टः इति ।

श्रीमद्भागवतेऽपि गीतावत् परतत्त्वम् आत्मस्वरूपेण व्यक्तित्वविहीनं अनन्तं परमात्मतत्त्वं मन्यमानं सत् सर्वोच्चस्य परात्परस्य वा देवाधिदेवस्य भगवतः वासुदेवस्य रूपे विशिष्टव्यक्तित्वसम्पन्नं अपि मतं अस्ति । यतः विशिष्टदिव्य व्यक्तित्व सम्पन्नरूपे इदं परतत्त्वं अत्र प्राय: " भगवान् "इति कथितम् अस्ति, अत: आत्मस्वरूपेण व्यक्तित्वविहीनेव्यक्तित्वयुक्ते च परतत्त्वे ऐक्यबोधनाय अत्र इदं कथितं अस्ति यत्---

" वदन्ति तत्तत्वविदस्तत्त्वं यद्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्दयते " ।। श्री.भा.1-2-11

एतदतिरिक्तं अत्र स्पष्टरूपेणापि " सञ्चिन्तयेद्भगवत श्चरणारविन्दम्" इत्यादि प्रकारेण अनेकशः भगवतः दिव्यस्य रूपस्य निर्देश :कृतः वर्तते। वस्तुतः, अत्र परतत्त्वस्य भगवत्त्वं अर्थात् ज्ञानाद्यनन्तगुणयुक्तत्वे सति दिव्यमङ्गलविग्रहयुक्तत्वं अधिकं प्रकाशितं अस्ति । भगवतः नित्यस्य धाम्नः अपि अत्र अनेकशःनिर्दिशोऽस्ति । भागवत धर्मस्य एकस्य प्रमुखस्य सिध्दान्तन्तस्य-अवतारवादस्य तु इदंपुराणं एकं विशिष्टं व्याख्यानं एवास्तिI अत्र "अवतारा ह्यसंख्येया: हरे: सत्त्वनिधेर्द्विजाः" इत्यादि प्रकारेण भगवदवताराणां असंख्येयत्वं प्रतिपाद्य सर्वत्रापि प्राय: अवताराणां चरितानि एवं मुख्यतया वर्णितानि सन्ति ।

गीतवत् अत्रापि प्रकृतिपुरुषयोः भगवदाधारकत्वं तत्परतन्त्रत्वं च मला भगवान् वासुदेव एव –

" वासुदेवात्परो ब्रह्मन् नचान्थोऽर्थोऽस्तितत्त्वतः" I श्री.भा 2-5-14

इति वाक्यानुसारेण परात्परः परमप्राप्यश्च मतः अस्ति, सर्वेषांच वेदयज्ञादीनाम्---

" वासुदेवपरा वेदा वासुदेवपरा मखाःI " श्री.भा 1-2-28

इत्यादिरूपेण वासुदेवपरतत्वं एव स्थापितमस्ति I

**भागवते भगवद्भक्ति : –** अहमात्मात्मानां धातः प्रेष्टस्सन् प्रेयसामपि I

अतो मयि रतिं कुर्याद देहादिर्यत्कृतेप्रियःIIश्री.भा 3-9-42

इत्यादिप्रकारेण वस्तुतः भगवतः सर्वेषां आत्मनां आत्मत्वेन तेन सर्वेषांश्रेष्टेन फलतः ईप्सितेन च श्राव्यम्, किन्तु अज्ञानवशात् जीवः इदं न जानाति। अतः तस्मिन् रतिं न करोति। अतः सर्वप्रथमं एतादृशेन ज्ञानेन भाव्यम् । एतादृशस्य ज्ञानस्य प्रमुख साधनम् I

"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।

जनयत्याशु वैराग्यं ज्ञानं चयद्हैतुकम् " ॥श्री.भा 1-2-7

इतिश्लोकप्रकारेण भक्तियोगः अस्ति I फलतः स एव सदाचरणसत्सङ्गसेवनादिकः धर्मः पन्थाः वा सर्वोत्तमः अस्ति येन नासुदेवे भगवति भक्तिः स्यात् --

" सवै पुंसां परो धर्मः यतोभक्तिरधोक्षजे "Iश्री.भा 1-2-6

"वासुदेवे भगवति भक्तियोगो यतो भवेत् "IIश्री.भा 2-2-33

भक्तियोगेन अन्येन केनापि साधनेन वा जाते उक्तरूपे ज्ञानेऽपि भक्तेः सहभावः परमावश्यकः अस्ति। भक्तिंविना ज्ञानंशुष्कं शोचाविहीनं चास्ति यथा ---- "नैष्कर्म्यमप्यच्युत भाववर्जितं I

न शोभते ज्ञानमलं निरञ्जनम् " IIश्री.भा 1-5-12

भक्तिमार्गे च केवलं भगवान् एव श्रेष्ठः प्राप्यः अस्ति , मुक्तिश्च आनुषङ्गिकी भगवत्प्रास्त्यन्तर्भूता वा वर्तते I अतः उक्तप्रकारके जाने जाते अत्र लोके परत्र च परमश्रेष्ठस्य प्रीणनार्थं एव कर्म भक्त्यादिकं सर्वं कर्तव्यम्। सामान्यतः भगवत्प्रीणनार्थं कुतेन सर्वेणापि कर्मज्ञान भक्त्यादिना भगवान् प्रीतः भवति । किन्तु भक्त्यैव सर्वाधिकरुपेण प्रीतः भवति ---

"नालंद्विजत्वं देवत्वमृषित्वं  वासुरात्मजाः ।
प्रीणनाथ मुकुन्दस्य नवृत्तं न बहुज्ञातौ" II श्री.भा 7-7-51
"न दानं म तपो नेज्या न शौचं न व्रतानि च।
प्रीयतेऽमलया भक्त्या हरि रन्यद विडम्बनम् II श्री.भा 7-7-52

एवं कर्मज्ञानादिकं भक्तेः अङ्मात्रं अस्ति I केवलं भक्तिः एव भावतः प्रीणनस्य प्रमुखं साधनं अस्ति । भक्तेः चरमं रूपं -----

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् I
अर्चनं वन्दनं दास्यं संख्यमात्मनिवेदनम् II श्री.भा 7-5-23

इत्यादिप्रकारेण सर्वात्मभावेन भगवते आत्मनिवेदनरूपं तस्य शरणवरणमस्ति |भगवदर्पितात्मानां सर्वात्मभावेन कृतया शरणागतिरुपया भकत्याप्रीतः सन् भगवान् अस्वतन्त्र इव तदधीनः भवति यथा---

" अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विजः I श्री.भा 9-4-63
"हित्वामां शरणं याताः कथं तांस्त्यक्तुमुत्सहे I श्री.भा 9-4-65

इत्यादिवाक्यद्वयेन तान् कथमपि त्यक्तुं न उत्सहते । यद्यपि एतादृशाः एकान्तिनः भगवद्भक्ताः " मामेष्यसि मुक्तबन्धुः " इत्यादि रूपेण स्वभावतःसंसारबन्धनमुक्ताः सन्त एव भगवतः नित्यं धाम गत्वा तत्र तम् प्राप्नुवन्ति Iकिन्तु ते मूलतः मुक्तिं न वाञ्छति, अपितु
भगवतः परमश्रेष्ठत्वात् अत्र परत्र वा केवलं भगवन्तं, तद्विषयिणीं रतिं तद्नुकूलं च तस्य भजनं सेवनं वा एव वाञ्छन्ति I

अत्र आगत्य भगवत्प्राप्तिसाधनभूता भक्तिः साधनरूपा न सत्यपि अहैतुक्याः स्वाभाविक्याः वा परायाः भक्तेः भगवद्रतेः वा रूपे परमंसाध्यं भवति I  यतः एतादृशाः अन्यनिरपेक्षाः अनन्याः वा भक्ताः भगवतः प्रियतमाः भवन्ति, अतः सः सर्वदा अत्र परत्र च तेषां प्रेमपराधीनः तिष्ठति। एवं, यथा चोक्तेन संक्षिप्तेन विवेचनेन स्पष्टमस्ति I भगवता श्रीकृष्णेन उपदिष्टस्य गीताप्रतिपादितस्य भागवत धर्मस्यैव सिद्धान्ताः श्रीमद्भागवते प्रागेव स्पष्टतया व्याख्याताः सन्ति । अस्य भागवत धर्मस्य भगवदर्चासम्बन्धि यत् पाञ्चरात्रादिषु वैष्णवागमेणु प्रतिपादितं विशिष्टंतान्त्रिकं रूपं विकसितं, तत् अपि अत्र संक्षेपतः वर्णितं उपलभ्यते।

अस्तु ! एवं यत: भागवतानांवैष्णवानां वा उक्तरूपःजगत् कल्याणकरः भगवत्प्रियश्च परम: धर्म: श्रीमद्भागवते वर्णितः अस्ति I अतः अनेन अस्मिन् रूपे कृता स्वस्य विज्ञप्तिः पूर्णतः अवितथा एवास्तियत् ---

"धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्
वेद्यं वास्तव मत्र वस्तुशिवदं तापत्रयोन्मूलनम् I
श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः
सद्योहृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् IIश्री.भा 1-1-2